# Skandaproktam Shatarudriyamahatmyam 2

# સ્કન્દપ્રોક્તં શતરુદ્રીયમાહાત્મ્યમ્ ૨

## Document Information

Text title : Skandaproktam Shatarudriyamahatmyam 2

File name : skandaproktaMshatarudrIyamAhAtmyam2.itx

Category : shiva, shivarahasya, mAhAtmya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshvarAkhyaH dashamAMshaH | adhyAyaH 28 | 1-68||

Latest update : September 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 10, 2024

*sanskritdocuments.org*

Skandaproktam Shatarudriyamahatmyam 2

# સ્કન્દપ્રોક્તં શતરુદ્રીયમાહાત્મ્યમ્ ૨

(શિવરહસ્યાન્તર્ગતે ઈશ્વરાખ્યે)

- જૈગીષવ્યસ્કન્દસંવાદે -

સ્કન્દ ઉવાચ -

શતરુદ્રીયમાહાત્મ્યં પુનર્વક્ષ્યે મુનીશ્વર ।
શૃણ્ષ્વ શ્રદ્ધયા યુક્તો યદીચ્છસિ ભવક્ષયમ્ ॥ ૧॥

શાન્ત્યર્થં શગ્ચ મે સૂક્તં જપ્ત્વાદૌ મુનિપુઙ્ગવ ।
પ્રજપચ્છતરુદ્રીયં સમગ્રં નમકં તથા ॥ ૨॥

શમ્ભોરુપાસના પઞ્ચવિધા પ્રોક્તા મહર્ષિભિઃ ।
અસ્મિન્ સમગ્રનમકે નામાનિ ત્રિશતં દ્વિજ ॥ ૩॥

તિષ્ઠન્તિ શ્રુતિસારાણિ ભુક્તિમુક્તિકરાણિ હિ ।
એતૈર્યો નામભિર્લિઙ્ગે સ્થાવરે જઙ્ગમેઽપિ વા ॥ ૪॥

પૂજયેત્સા મહાપૂજા તયા પ્રીણાતિ શઙ્કરઃ ।
મયોક્તૈઃ શતસઙ્ખ્યાકૈર્મન્ત્રૈઃ શઙ્કરદૈવતૈઃ ॥ ૫॥

છન્દર્ષ્યાદિકમુક્ત્વાદૌ જ્વલિતે જાતવેદસિ
સ્વાહાન્તૈર્જુહુયાદ્રુદ્રાયેદન્નમમ કથ્યતે (?) ॥ ૬॥

એવં હોમેન ગૌરીશઃ પ્રીણાતિ ફલદાયકઃ ।
તર્પયેચ્છતરુદ્રીયમધ્યગૈઃ શતમન્ત્રકૈઃ ॥ ૭॥

શ્રીરુદ્રં તર્પયામીતિ પ્રોચ્ચરન્ સુસમાહિતઃ ।
ઉપાસનેયમિતિસ્યાદ્યાસા સર્વફલદાયિની ॥ ૮॥

ન્યાસઃ સ્યાન્મન્ત્રસન્નાહો ન્યાસહીનો ન સિદ્ધિદઃ ।
બોધાયનકૃતં સ્તોત્રં શતરુદ્રીયદીપનમ્ ॥ ૯॥

બોધાયનોક્તમાર્ગેણ ન્યાસં કૃત્વા વિચક્ષણઃ ।

પ્રજપ્ય શચ્ચમે સૂક્તમાદૌ વિઘ્નનિવૃત્તયે ॥ ૧૦॥

સમગ્રનમકસ્યાસ્ય વેદસારસ્ય બ્રાહ્મણાઃ ।
સવામદેવો યોઽઘોર ઋષિરિત્યુચ્યતે બધૈઃ ॥ ૧૧॥

છન્દાંસિ ચાસ્ય ગાયત્રી પઙ્ક્ત્યનુષ્ટુભ એવ ચ ।
જગતી બૃહતી ચેતિ દેવતા કથ્યતે તતઃ ॥ ૧૨॥

જપાકુસુમસાહસ્રસન્નિભે સૂર્યમણ્ડલે ।
મધ્યરૂપી વિરાડ્રૂપી વિધિવિષ્ણુશિવાત્મકઃ ॥ ૧૩॥

યોઽસાવાદિત્યપુરુષઃ શ્રીરુદ્રાખ્યઃ પરઃ શિવઃ ।
પરમેશ્વરઃ (શઃ) સ વિજ્ઞેય શિવઃ સત્યં ચિદાત્મકમ્ ॥ ૧૪॥

સમગ્રનમકસ્યાસ્ય કથિતં દૈવતં દ્વિજાઃ ।
પ્રીત્યર્થં પરમેશસ્ય વિનિયોગ ઉદાહૃતઃ ॥ ૧૫॥

ઋષિચ્છન્દોદૈવતાનિ વિહિતાનિ સમાહિતઃ ।
ધ્યાયેન્નિરામયં વસ્તુ સર્ગસ્થિતિલયાધિકમ્ ॥ ૧૬॥

યદેવ વ્યવહારાણામાધારં પ્રકૃતેઃ પરમ્ ।
નિર્ગુણં નિષ્કલં નિત્યં મનોવાચામગોચરમ્ ॥ ૧૭॥

પરં તેજોઽહમસ્મીતિ ધ્યાત્વૈવં મુનિપુઙ્ગવાઃ ।
સગુણં હૃદયે ધ્યાયેદ્બ્રહ્મરન્ધ્રેઽથવા પ્રભુમ્ ॥ ૧૮॥

(સગુણ ધ્યાનમ્)
શુદ્ધસ્ફટિકસઙ્કાશં મધ્યાહ્નાદિત્યસન્નિભમ્ ।
સ્વસંવેદ્યમનાદ્યન્તં શ્વેતપદ્માયુતપ્રભમ્ ॥ ૧૯॥

ગઙ્ગાધરં શશિધરં જટામકુટભૂષિતમ્ ।
શ્વેતભૂતિત્રિપુણ્ડ્રેણ વિરાજિતલલાટકમ્ ॥ ૨૦॥

લોચનત્રયસમ્પન્નં સ્વર્ણકુણ્ડલશોભિતમ્ ।
બિમ્બાધરં ચતુર્બાહું મુક્તાહારોપશોભિતમ્ ॥ ૨૧॥

અક્ષમાલાંસુધાકુમ્ભં ચિન્મયીં મુદ્રિકામપિ ।
પુસ્તકં ચ ભુજૈર્દિવ્યૈર્દધાનં પાર્વતીપતિમ્ ॥ ૨૨॥

શુક્લયજ્ઞોપવીતેન શ્વેતવસ્ત્રેણ શોભિતમ્ ।
શ્વેતામ્બરધરં શ્વેતં રત્નસિહ્માસને સ્થિતમ્ ॥ ૨૩॥

વીરાસને સમાસીનં વિરાડ્રૂપિણમીશ્વરમ્ ।
સન્તપ્તહેમરુચિરસ્વઙ્ગુલીયકભૂષિતમ્ ॥ ૨૪॥

મુક્તામાણિક્ય સૌવર્ણકાઞ્ચીદામવિરાજિતમ્ ।
યોગિભિઃ સનકાદ્યૈશ્ચ સ્તૂયમાનમહર્નિશમ્ ॥ ૨૫॥

દાતારં સર્વવિદ્યાનાં સકલૈશ્વર્યદાયકમ્ ।
સર્વાભીષ્ટપ્રદાચારં વટમૂલનિવાસિનમ્ ॥ ૨૬॥

સત્યાનન્દચિદાત્માનં શઙ્કરં પરમેશ્વરમ્ ।
વામાઙ્કે સંસ્થિતાં ગૌરીં બાલાર્કાયુતસન્નિભામ્ ॥ ૨૭॥

જપાકુસુમસાહસ્રસમાનશ્રિયમીશ્વરીમ્ ।
સુવર્ણરત્નખચિતમકુટેન વિરાજિતામ્ ॥ ૨૮॥

લલાટપટ્ટસમ્રાજત્સંલગ્નતિલકાઙ્કિતામ્ ।
ભ્રમદ્ભ્રમરનીલાભધમ્મિલ્લાલકશોભિતામ્ ॥ ૨૯॥

સૌન્દર્યભ્રાજત્કામેશ કોદણ્ડભ્રૂયુગાન્વિતામ્ ।
રાજીવાયતનેત્રાં તાં નીલોત્પલદલેક્ષણામ્ ॥ ૩૦॥

મુક્તામાણિક્યખચિત નાસિકાભરણાન્વિતામ્ ।
પક્વબિમ્બફલાભાસ્વદધર દ્વયરાજિતામ્ ॥ ૩૧॥

દાડિમીબીજસઙ્કાશદ્વાત્રિંશદ્દન્તશોભિતામ્ ।
સન્તપ્તહેમખચિત તાટઙ્કાભરણાન્વિતામ્ ॥ ૩૨॥

કુણ્ડલદ્વયસંશોભિકર્ણયુગ્મવિરાજિતામ્ ।
તામ્બૂલચર્વણરતાં નવરત્નવિરાજિતામ્ ॥ ૩૩॥

આઢ્ય(દ્ય)ભૂષણ સૌવર્ણ ચિત્રકાભરણાન્વિતામ્ ।
પદકાભરણોપેતાં મુક્તાહારોપશોભિતામ્ ॥ ૩૪॥

ઇક્ષુકાર્મુકપુષ્પેષુચાપબાણશરાવરૈઃ ।
દિવ્યાઙ્ગુલીયકયુતૈઃ કેયૂરયુગલાન્વિતૈઃ ॥ ૩૫॥

સ્વર્ણકઙ્કણસંયુક્તૈશ્ચતુર્ભિર્બાહુભિર્યુતામ્ ।
સુવર્ણરત્નખચિતકાઞ્ચીઘણ્ટા(ણ્ટી)વિરાજિતામ્ ॥ ૩૬॥

સૌભાગ્યભૂષણયુતાં સૂક્ષ્મમધ્યવિરાજિતામ્ ।

રક્તચન્દનસંલિપ્તહેમકુમ્ભોપમસ્તનીમ્ ॥ ૩૭॥

રક્તવસ્ત્રપરીધાનાં રક્તમાલ્યવિભૂષિતામ્ ।
તનુમધ્યાં પૃથુશ્રોણીં શિવવામાઙ્કસંશ્રયામ્ ॥ ૩૮॥

કદલીલલિતસ્તમ્ભસન્નિભોરુયુગાન્વિતામ્ ।
સુવર્ણપાદકટકયુગલેન સુશોભિતામ્ ॥ ૩૯॥

સન્તપ્તહેમપાદાઙ્ગુલીયકૈઃ સુવિરાજિતામ્ ।
પૂર્ણચન્દ્રમુખીમમ્બાં સુસ્મિતાસ્યવિરાજિતામ્ ॥ ૪૦॥

બ્રહ્મવિષ્ણુમહેન્દ્રાદિશિરોમકુટજાતયા ।
શ્રિયા વિરાજિતપદાં ભક્તત્રાણપરાયણામ્ ॥ ૪૧॥

સ્વકાન્ત્યા શઙ્કરં દેવં પુનરપ્યરુણીકૃતમ્ ।
સર્વાલઙ્કારસુભગં યુવાનમતિસુન્દરમ્ ॥ ૪૨॥

છત્રેણ શોભિતં મૂર્ધ્નિ ચામરાભ્યાં વિરાજિતમ્ ।
બ્રહ્મવિષ્ણુમહેન્દ્રાદિવન્દ્યમાનપદામ્બુજમ્ ॥ ૪૩॥

સૃષ્ટિસ્થિત્યુપસંહારહેતુભૂતં સનાતનમ્ ।
અન્યોન્યાશ્લિષ્ટહૃદ્બાહું ગૌરીશઙ્કરસંજ્ઞિતમ્ ॥ ૪૪॥

સનાતનં પરમ્બ્રહ્મ પરમાત્માનમવ્યયમ્ ।
નમામિ જગતામીશં પરમાત્મનમવ્યયમ્ ॥ ૪૫॥

- -

એવં ધ્યાત્વા જપેન્નિત્યં શતરુદ્રીયમાદરાત્ ।
નમકં રુદ્રસઙ્ખ્યાકાનનુવાકાઞ્જપેત્તતઃ ॥ ૪૬॥

એકવારં દ્વિવારં વા ત્રિવારં ચમકાન્વિતમ્ ।
નમકં પ્રજપેદેષા જપોપાસ્તિરિતીરિતા ॥ ૪૭॥

શિવપ્રીતિકરા શ્રેષ્ઠા શ્રીરુદ્રૈક્યપ્રદાયિની ।
સ્થાવરે જઙ્ગમે લિઙ્ગે સમાહિતમનાઃ શુચિઃ ॥ ૪૮॥

ન્યાસધ્યાનાદિસહિતં શઞ્ચમે સૂક્તપૂર્વકમ્ ।
પ્રજપઞ્છતરુદ્રીયમભિષેકં સમાચરેત્ ॥ ૪૯॥

એકવારં દ્વિવારં વા ત્રિવારં ચમકાન્વિતા ।
ઉપાસ્તિઃ પઞ્ચમી પ્રોક્તા શમ્ભોઃ પ્રીતિકરી શુભા ॥ ૫૦॥

વિશેષમન્ત્રાન્ વક્ષ્યામિ શ ृણુધ્વં દ્વિજપુઙ્ગવાઃ ।
જપ્ત્વા સમગ્રનમકં શતરુદ્રીયમુત્તમમ્ ॥ ૫૧॥

ચમકસ્યાનુવાકસ્ય ચૈકમેકં તતો જપેત્ ।
રુદ્રૈકાદશિનીમેતાં પ્રજપઞ્છઙ્કરોપરિ ॥ ૫૨॥

કરોતિ યોઽભિષેકં હિ નિયમેનૈકમણ્ડલમ્ ।
સ મહાપાતકૈસ્ત્યક્તો રાજસૂયફલં લભેત્ ॥ ૫૩॥

શતમન્ત્રૈશ્ચતુર્વારં જુહુયાત્પાયસં શુભમ્ ।
રુદ્રસઙ્ખ્યાનુવાકૈશ્ચ જપહોમાર્ચનં તતઃ ॥ ૫૪॥

મધુત્રિતયસંયુક્તં મહાપાપૈઃ પ્રયુચ્યતે ।
અભિષેકં કેવલં વા મણ્ડલં યઃ કરોતિ હિ ॥ ૫૫॥

ઇહ ભુક્ત્વાઽખિલાન્ભોગાન્ પરેબ્રહ્મણિલીયતે ।
પૂજયાભ્યધિકો હોમો હોમાત્તર્પણમુત્તમમ્ ॥ ૫૬॥

તર્પણાચ્ચ જપઃ શ્રેષ્ઠો હ્યભિષેકઃ પરો જપાત્ ।
રુદ્રૈકાદશનીં જપ્ત્વા પ્રજપેચ્છાન્તિપઞ્ચકમ્ ॥ ૫૭॥

અન્યથા તસ્ય સંસિદ્ધિર્નાસ્તિ નાસ્તિ તપોધનાઃ ।
યદા ભક્ત્યુદયો નૃણાં તદોપસ્તિં સમાચરેત્ ॥ ૫૮॥

ચતુરસ્રં વરં કુણ્ડં હોમકાલે વિધીયતે ।
ગણેશમાદૌ સમ્પૂજ્ય કૃત્વા નિયમમેવ ચ ॥ ૫૯॥

ઉપાસનાપઞ્ચકાર્યં કૃત્વા નિયમમાદિતઃ ।
સમગ્રં નમકં પ્રાતઃ પ્રજપેચ્ચમકાન્વિતમ્ ॥ ૬૦॥

સ મહાપાતકૈર્મુક્તઃ શિવસાયુજ્યમશ્નુતે ।
મધ્યાહ્ને પ્રજપેદ્યસ્તુ ચમકેન યુતં દ્વિજાઃ ॥ ૬૧॥

સ સૂર્યમણ્ડલં ભિત્વા ગણાનામગ્રણીર્ભવેત્ ।
સાયઙ્કાલે જપેદ્યસ્તુ નમકં ચમકાન્વિતમ્ ॥ ૬૨॥

અવાપ્ય સકલાન્ભોગાન્ પરેબ્રહ્મણિ લીયતે ।
ભૂતિભૂષિતસર્વાઙ્ગો લિઙ્ગપૂજારતઃ શુચિઃ ॥ ૬૩॥

નમકં ચમકં નિત્યં પ્રજપેત્ફલદાયકમ્ ।

વેદસારાણિ નામાનિ કથિતાન્યત્ર તાનિ હિ ॥ ૬૪॥

એતજ્જાપ્યમૃતો ભૂત્વા બ્રહ્મભૂયાય કલ્પતે ।
એતેન શતરુદ્રીયં ન્યાસધ્યાનાદિકં શુભમ્ ॥ ૬૫॥

મયોક્તં બ્રાહ્મણશ્રેષ્ઠાઃ કિં પુનઃ શ્રોતુમિચ્છથ ॥ ૬૬॥

(ફલમ્)
એકાવૃત્ત્યાઽઘનાશો ભવતિ ગિરિસુતે તદ્દ્વયે વૈ ગણેન્દ્રઃ
કૈલાસં પ્રવિશેચ્ચતત્રિતયતઃ શ્રીરુદ્રજાપી નરઃ ।
ષડ્વારં પ્રજપંશ્ચ મુક્તિફલભાગ્ભૂયો ભવેચ્છામ્ભવઃ
શ્રીરુદ્રાર્ચનતઃ સુબિલ્વકુસુમૈર્લિઙ્ગે ચ સાક્ષાચ્છિવઃ ॥ ૬૭॥

છન્દોદૈવતસર્ષિકં મનુગણં જપ્ત્વા ભવેત્પાવનઃ
નૈતદ્વેદ યદિ શ્રુતીશતગતં જપ્તાશ્ચ તે નિષ્ફલાઃ ।
તસ્માજ્જ્ઞાનત એવ વિત્ત તદિમં જપ્ત્વા વિમુક્તો ભવેત્
હુત્વા ચાપ્યભિષિચ્ય વા દ્વિજવરો વિન્દેત સર્વં ફલમ્ ॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં શતરુદ્રીયમાહાત્મ્યં ૨ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશ્વરાખ્યઃ દશમાંશઃ । અધ્યાયઃ ૨૮ । ૧-૬૮॥

- .. shrIshivarahasyam . IshvarAkhyaH dashamAMshaH . adhyAyaH 28 . 1-68..

Notes:
Skanda સ્કન્દ details to Jaigīṣavya જૈગીષવ્ય about the procedure to be followed for worshipping Śiva શિવ through Rudraikādaśinī રુદ્રૈકાદશિની, Śatarudrīyam શતરુદ્રીયમ્ etc., and talks about the sequencing and number of times the Namakam નમકમ્ and Camakam ચમકમ્ are meant to be recited for such procedures.
Skanda સ્કન્દ mentions in detail about the Saguṇa Śiva Dhyāna સગુણ શિવ ધ્યાન in Śloka numbers 19 to 45. He concludes about the Śatarudrīya Māhātmyam શતરુદ્રીયમાહાત્મ્યમ્ by highlighting the phalam ફલમ્ of Rudrārcana રુદ્રાર્ચન.

Proofread by Ruma Dewan

*Skandaproktam Shatarudriyamahatmyam 2*

pdf was typeset on September 10, 2024

Please send corrections to *sanskrit@cheerful.com*